श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.6- प्रथम सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्**

**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कंधः**

**॥ अथ षष्ठोऽध्यायः ॥**

**श्रीशुक उवाच**

**अथ ब्रह्माऽऽत्मजैर्देवैः(फ्), प्रजेशैरावृतोऽभ्यगात्।**
**भवश्च भूतभव्येशो, ययौ भूतगणैर्वृतः॥ 1॥**

**इन्द्रो मरुद्भिर्भगवा-नादित्या वसवोऽश्विनौ।**
**ऋभवोऽङ्गिरसो रुद्रा, विश्वे साध्याश्च देवताः॥ 2॥**

**गन्धर्वाप्सरसो नागाः(स्), सिद्धचारणगुह्यकाः।**
**ऋषयः(फ्) पितरश्चैव, सविद्याधरकिन्नराः॥ 3॥**

द्वारकामुपसं(ञ्)जग्मुः(स्), सर्वे कृष्णदिदृक्षवः।
वपुषा येन भगवान्, नरलोकमनोरमः।
यशो वितेने लोकेषु, सर्वलोकमलापहम्॥ 4॥

तस्यां(वँ) विभ्राजमानायां(म्), समृद्धायां(म्) महर्द्धिभिः।
व्यचक्षतावितृप्ताक्षाः(ख्), कृष्णमद्भुतदर्शनम्॥ 5॥

स्वर्गोद्यानोपगैर्माल्यैश्- छादयन्तो यदूत्तमम्।
गीर्भिश्चित्रपदार्थाभिस्- तुष्टुवुर्जगदीश्वरम्॥ 6॥

देवा ऊचुः
नताः(स्) स्म ते नाथ पदारविन्दं(म्),
बुद्धीन्द्रियप्राणमनोवचोभिः।
यच्चिन्त्यतेऽन्तर्हृदि भावयुक्तैर्-
मुमुक्षुभिः(ख्) कर्ममयोरुपाशात्॥ 7॥

त्वं(म्) मायया त्रिगुणयाऽऽत्मनि दुर्विभाव्यं(वँ),
व्यक्तं(म्) सृजस्यवसि लुम्पसि तद्गुणस्थः।
नैतैर्भवानजित कर्मभिरज्यते वै,
यत् स्वे सुखेऽव्यवहितेऽभिरतोऽनवद्यः॥ 8॥

शुद्धिर्नृणां(न्) न तु तथेड्य दुराशयानां(वँ),
विद्याश्रुताध्ययनदानतपः(ख्)क्रियाभिः।
सत्त्वात्मनामृषभ ते यशसि प्रवृद्ध-
सच्छ्रद्धया श्रवणसम्भृतया यथा स्यात्॥ 9॥

स्यान्नस्तवाङ्घ्रिरशुभाशयधूमकेतुः,
क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः।
यः(स्) सात्वतैः(स्) समविभूतय आत्मवद्भिर्-
व्यूहेऽर्चितः(स्) सवनशः(स्) स्वरतिक्रमाय॥ 10॥

यश्चिन्त्यते प्रयतपाणिभिरध्वराग्नौ,
त्रय्या निरुक्तविधिनेश हविर्गृहीत्वा।
अध्यात्मयोग उत योगिभिरात्ममायां(ञ्),
जिज्ञासुभिः(फ्) परमभागवतैः(फ्) परीष्टः॥ 11॥

पर्युष्टया तव विभो वनमालयेयं(म्),
सं(म्)स्पर्धिनी भगवती प्रतिपत्निवच्छ्रीः।
यः(स्) सुप्रणीतममुयार्हणमाददन्नो,
भूयात् सदाङ्घ्रिरशुभाशयधूमकेतुः॥ 12॥

केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको,
यस्ते भयाभयकरोऽसुरदेवचम्वोः।
स्वर्गाय साधुषु खलेष्वितराय भूमन्,
पादः(फ्) पुनातु भगवन् भजतामघं(न्) नः॥ 13॥

नस्योतगाव इव यस्य वशे भवन्ति,
ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः।
कालस्य ते प्रकृतिपूरुषयोः(फ्) परस्य,
शं(न्) नस्तनोतु चरणः(फ्) पुरुषोत्तमस्य॥ 14॥

अस्यासि हेतुरुदयस्थितिसंयमाना-
मव्यक्तजीवमहतामपि कालमाहुः।
सोऽयं(न्) त्रिणाभिरखिलापचये प्रवृत्तः(ख्),
कालो गभीररय उत्तमपूरुषस्त्वम्॥ 15॥

त्वत्तः(फ्) पुमान् समधिगम्य यया स्ववीर्यं(न्),
धत्ते महान्तमिव गर्भममोघवीर्यः।
सोऽयं(न्) तयानुगत आत्मन आण्डकोशं(म्),
हैमं(म्) ससर्ज बहिरावरणैरुपेतम्॥ 16॥

तत्तस्थुषश्च जगतश्च भवानधीशो,
यन्माययोत्थगुणविक्रिययोपनीतान्।
अर्थां(ञ्)जुषन्नपि हृषीकपते न लिप्तो,
येऽन्ये स्वतः(फ्) परिहृतादपि बिभ्यति स्म॥ 17॥

स्मायावलोकलवदर्शितभावहारि-
भ्रूमण्डलप्रहितसौरतमन्त्रशौण्डैः।
पत्न्यस्तु षोडशसहस्रमनं(ङ्)गबाणैर्-
यस्येन्द्रियं(वँ) विमथितुं(ङ्) करणैर्न विभ्व्यः॥ 18॥

विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः(फ्),
पादावनेजसरितः(श्) शमलानि हन्तुम्।
आनुश्रवं(म्) श्रुतिभिरङ्घ्रिजमङ्गसङ्गैस्-
तीर्थद्वयं(म्) शुचिषदस्त उपस्पृशन्ति॥ 19॥

बादरायणिरुवाच
इत्यभिष्टूय विबुधैः(स्), सेशः(श्) शतधृतिर्हरिम्।

अभ्यभाषत गोविन्दं(म्), प्रणम्याम्बरमाश्रितः॥ 20॥

ब्रह्मोवाच

भूमेर्भारावताराय, पुरा विज्ञापितः(फ्) प्रभो।
त्वमस्माभिरशेषात्मं(म्)स्-तत्तथैवोपपादितम्॥ 21॥

धर्मश्च स्थापितः(स्) सत्सु, सत्यसन्धेषु वै त्वया।
कीर्तिश्च दिक्षु विक्षिप्ता, सर्वलोकमलापहा॥ 22॥

अवतीर्य यदोर्वं(म्)शे, बिभ्रद् रूपमनुत्तमम्।
कर्माण्युद्दामवृत्तानि, हिताय जगतोऽकृथाः॥ 23॥

यानि ते चरितानीश, मनुष्याः(स्) साधवः(ख्) कलौ।
श्रृण्वन्तः(ख्) कीर्तयन्तश्च, तरिष्यन्त्यञ्जसा तमः॥ 24॥

यदुवं(म्)शेऽवतीर्णस्य, भवतः(फ्) पुरुषोत्तम।
शरच्छतं(वँ्) व्यतीयाय, पं(ञ्)चविं(म्)शाधिकं(म्) प्रभो॥ 25॥

नाधुना तेऽखिलाधार, देवकार्यावशेषितम्।
कुलं(ञ्) च विप्रशापेन, नष्टप्रायमभूदिदम्॥ 26॥

ततः(स्) स्वधाम परमं(वँ्), विशस्व यदि मन्यसे।
सलोकाँल्लोकपालान् नः(फ्), पाहि वैकुण्ठ किं(ङ्)करान्॥ 27॥

श्रीभगवानुवाच

अवधारितमेतन्मे, यदात्थ विबुधेश्वर।
कृतं(वँ्) वः(ख्) कार्यमखिलं(म्), भूमेर्भारोऽवतारितः॥ 28॥

तदिदं(यँ) यादवकुलं(वँ), वीर्यशौर्यश्रियोद्धतम्।
लोकं(ञ्) जिघृक्षद् रुद्धं(म्) मे, वेलयेव महार्णवः॥ 29॥

यद्यसं(म्)हृत्य दृप्तानां(यँ), यदूनां(वँ) विपुलं(ङ्) कुलम्।
गन्तास्म्यनेन लोकोऽय-मुद्वेलेन विनङ्क्ष्यति॥ 30॥

इदानीं(न्) नाश आरब्धः(ख्), कुलस्य द्विजशापतः।
यास्यामि भवनं(म्) ब्रह्मन् -नेतदन्ते तवानघ॥ 31॥

श्रीशुक उवाच
इत्युक्तो लोकनाथेन, स्वयम्भूः(फ्) प्रणिपत्य तम्।
सह देवगणैर्देवः(स्), स्वधाम समपद्यत॥ 32॥

अथ तस्यां(म्) महोत्पातान्, द्वारवत्यां(म्) समुत्थितान्।
विलोक्य भगवानाह, यदुवृद्धान् समागतान्॥ 33॥

श्रीभगवानुवाच
एते वै सुमहोत्पाता, व्युत्तिष्ठन्तीह सर्वतः।
शापश्च नः(ख्) कुलस्यासीद्, ब्राह्मणेभ्यो दुरत्ययः॥ 34॥

न वस्तव्यमिहास्माभिर्-जिजीविषुभिरार्यकाः।
प्रभासं(म्) सुमहत्पुण्यं(यँ), यास्यामोऽद्यैव मा चिरम्॥ 35॥

यत्र स्नात्वा दक्षशापाद्, गृहीतो यक्ष्मणोडुराट्।
विमुक्तः(ख्) किल्बिषात् सद्यो, भेजे भूयः(ख्) कलोदयम्॥ 36॥

वयं(ञ्) च तस्मिन्नाप्लुत्य, तर्पयित्वा पितृन् सुरान्।
भोजयित्वोशिजो विप्रान्, नानागुणवतान्धसा॥ 37॥

तेषु दानानि पात्रेषु, श्रद्धयोप्त्वा महान्ति वै।
वृजिनानि तरिष्यामो, दानैर्नौभिरिवार्णवम्॥ 38॥

श्रीशुक उवाच
एवं(म्) भगवताऽऽदिष्टा, यादवाः(ख्) कुलनन्दन।
गन्तुं(ङ्) कृतधियस्तीर्थं(म्), स्यन्दनान् समयूयुजन्॥ 39॥

तन्निरीक्ष्योद्धवो राजन्, श्रुत्वा भगवतोदितम्।
दृष्ट्वारिष्टानि घोराणि, नित्यं(ङ्) कृष्णमनुव्रतः॥ 40॥

विविक्त उपसं(ङ्)गम्य, जगतामीश्वरेश्वरम्।
प्रणम्य शिरिसा पादौ, प्रां(ञ्)जलिस्तमभाषत॥ 41॥

उद्धव उवाच
देवदेवेश योगेश, पुण्यश्रवणकीर्तन।
सं(म्)हृत्यैतत् कुलं(न्) नूनं(लँ), लोकं(म्) सन्त्यक्ष्यते भवान्।
विप्रशापं(म्) समर्थोऽपि, प्रत्यहन्न यदीश्वरः॥ 42॥

नाहं(न्) तवाङ्घ्रिकमलं(ङ्), क्षणार्धमपि केशव।
त्यक्तुं(म्) समुत्सहे नाथ, स्वधाम नय मामपि॥ 43॥

तव विक्रीडितं(ङ्) कृष्ण, नृणां(म्) परममङ्गलम्।
कर्णपीयूषमास्वाद्य, त्यजन्त्यन्यस्पृहां(ञ्) जनः॥ 44॥

शय्यासनाटनस्थानस्-नानक्रीडाशनादिषु।
कथं(न्) त्वां(म्) प्रियमात्मानं(वँ), वयं(म्) भक्तास्त्यजेमहि॥ 45॥

त्वयोपभुक्तस्रग्गन्ध-वासोऽलङ्कारचर्चिताः।
उच्छिष्टभोजिनो दासास्-तव मायां(ञ्) जयेमहि॥ 46॥

वातरशना य ऋषयः(श्), श्रमणा ऊर्ध्वमन्थिनः।
ब्रह्माख्यं(न्) धाम ते यान्ति, शान्ताः(स्) सं(न्)न्यासिनोऽमलाः॥ 47॥

वयं(न्) त्विह महायोगिन्, भ्रमन्तः(ख्) कर्मवर्त्मसु।
त्वद्वार्तया तरिष्यामस्-तावकैर्दुस्तरं(न्) तमः॥ 48॥

स्मरन्तः(ख्) कीर्तयन्तस्ते, कृतानि गदितानि च।
गत्युत्स्मितेक्षणक्ष्वेलि, यन्नृलोकविडम्बनम्॥ 49॥

श्रीशुक उवाच
एवं(वँ) विज्ञापितो राजन्, भगवान् देवकीसुतः।
एकान्तिनं(म्) प्रियं(म्) भृत्य-मुद्धवं(म्) समभाषत॥ 50॥

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
सं(म्)हितायामेकादशस्कन्धे षष्ठोऽध्यायः॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।